(७.४.७९/१३१७) इत्युक्तम्, चङ्परेऽपि तथा। [1]अचीकरत्। [2]अपीपचत्। 'ओः पुयण्ज्यपरे' (७.४.८०/२५७७) इत्युक्तम्, चङ्परेऽपि तथा। अपीपवत्। अलीलवत्। अजीजवत्। 'स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा' (७.४.८१/२५७८) इत्युक्तम्, चङ्परेऽपि तथा। असिस्रवत्, असुस्रवत्। अशिश्रवत्, अशुश्रवत्। अदिद्रवत्, अदुद्रवत्। अपिप्रवत्, अपुप्रवत्। अपिप्लवत्, अपुप्लवत्। अचिच्यवत्, अचुच्यवत्। लघुनि इति किम्? अततक्षत्। अररक्षत्। जागरयतेः अजजागरत्[3]। अत्र केचिद् गशब्दं लघुमाश्रित्य सन्वद्भावमिच्छन्ति, सर्वत्रैव लघोरानन्तर्यम[4]भ्यासेन नास्ति इति व्यवधानेऽपि [5]वचनप्रामाण्याद् भवितव्यम्[6], तदसत्। 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या.प. ४६) इत्येकेन व्यवधानमाश्रीयते, न पुनर[7]नेकेन। यद्येवम्, कथम् अचिक्षणत् इति? आचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामित्त्वम् इति। यदयं तद्बाधनार्थं स्मरत्यादीनामत्वं [8]विदधाति। चङ्परे इति किम्? [9]अहं पपच। परग्रहणं किम्? चङि एव केवले मा भूत्, अचकमत[10]। अनग्लोपे इति किम्? अचकथत्। दृषदमाख्यातवान् अददृषत्। वादितवन्तं प्रयोजितवान् [11]अवीवदत् इत्यत्र योऽसौ णौ णेर्लोपो नासावग्लोप इत्याश्रीयते। किं कारणम्? चङ्परे इति णिजातेर्निमित्तत्वेन [12]आक्षेपात्, ततोऽन्यस्य अको लोपः परिगृह्यते। मीमादीनामत्र ग्रहणात् सन्वद्भावेन अभ्यासलोपो न भवति इत्युक्तम्। किं च सन्वत् इति [13]सनाश्रयं कार्यमतिदिश्यते, न च [14]लोपः सनमेवापेक्षते, किं तर्हि, इस्भावाद्यपि। तदभावात् अमीमपत् इत्यादौ अभ्यासलोपो न [15]भविष्यति॥

## दीर्घो लघोः। (९४/२३१८)

[16]दीर्घो भवति लघोः अभ्यासस्य लघुनि णौ चङ्परे अनग्लोपे। अचीकरत्। अजीहरत्। अलीलवत्। अपीपचत्। लघोः इति किम्? अबिभ्रजत्। लघुनि इत्येव, अततक्षत्। [17]अररक्षत्। चङि इत्यव, अहं पपच। परे इत्येव, अचकमत। अनग्लोपे इत्येव, अचकथत्॥

## अत् स्मृदृत्वरप्रथम्रदस्तृस्पशाम्। (९५/२५६६)

स्मृ दृ त्वर प्रथ म्रद स्तृ स्पश इत्येतेषामभ्यासस्य अत् इत्ययमादेशो भवति चङ्परे णौ परतः। स्मृ – अससमरत्। दृ – अददरत्। त्वर – अतत्वरत्। प्रथ – अपप्रथत्। म्रद – अमम्रदत्। स्तृ – अतस्तरत्। स्पश – अपस्पशत्। सन्वद्भावात् इत्वं प्राप्तमनेन बाध्यते। तपरकरणसामर्थ्यात् अति कृते 'दीर्घो लघोः'(७.४.९४/२३१८) इत्येतदपि न भवति, अददरत्॥

## विभाषा वेष्टिचेष्ट्योः। (९६/२५८३)

वेष्टि चेष्टि इत्येतयोः अभ्यासस्य विभाषा अत् इत्ययमादेशो भवति चङ्परे णौ परतः। अववेष्टत्, अविवेष्टत्। अचचेष्टत्, अचिचेष्टत्। अभ्यासह्रस्वत्वे कृते अत्त्वं पक्षे भवति॥

---

1. अबीभवत् क.ह.ड. 2. अपीपठत् ह. 3. लुङि चङि जाग्रोऽविचिण्णल्ङित्सु इति गुणः इत्यधिकम् इ. 4. अभ्यासे इ.ह. 5. वचनप्रामाण्यात् नास्ति इ. 6. इति इत्यधिकम् ब. 7. सङ्घातेन क. ड. ह, वर्ण-सङ्घातेन इ. 8. शास्ति ह. 9. अहम् पपठ इ. 10. अमो हि कमेः प्रकृत्यन्तत्वात् एव लुङि चङ उपसंख्यानम् इत्यधिकम् इ. 11. वीणां परिवादकेन इत्यधिकम् ह. 12. आश्रयणात् इ.ह. 13. समाश्रयम् क. 14. अभ्यासलोपः इ. 15. भवति क. 16. लघुनि चङ्परे अनग्लोपे इति वर्तते इत्यधिकम् ह. 17. नास्ति इ.